# brAhmaNagItA

# બ્રાહ્મણગીતા

## Document Information

Text title : brAhmaNagItA

File name : braahmaNagiitaa.itx

Category : gItA, giitaa

Location : doc_giitaa

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi(sunderh at hotmail.com)

Description-comments : Adhyaya numbers 21-34 in Ashvamedhika, Mahabharata

Latest update : June 2, 1998, February 8, 2013

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 31, 2020

*sanskritdocuments.org*

# બ્રાહ્મણગીતા

અધ્યાયઃ ૨૧

બ્રાહ્મણ ઉવાચ

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
નિબોધ દશ હોતૄણાં વિધાનમિહ યાદૃશમ્ ॥ ૧॥

સર્વમેવાત્ર વિજ્ઞેયં ચિત્તં જ્ઞાનમવેક્ષતે ।
રેતઃ શરીરભૃત્કાયે વિજ્ઞાતા તુ શરીરભૃત્ ॥ ૨॥

શરીરભૃદ્ગાર્હપત્યસ્તસ્માદન્યઃ પ્રણીયતે ।
તતશ્ચાહવનીયસ્તુ તસ્મિન્સઙ્ક્ષિપ્યતે હવિઃ ॥ ૩॥

તતો વાચસ્પતિર્જજ્ઞે સમાનઃ પર્યવેક્ષતે ।
રૂપં ભવતિ વૈ વ્યક્તં તદનુદ્રવતે મનઃ ॥ ૪॥

બ્રાહ્મણ્યુવાચ

કસ્માદ્વાગભવત્પૂર્વં કસ્માત્પશ્ચાન્મનોઽભવત્ ।
મનસા ચિન્તિતં વાક્યં યદા સમભિપદ્યતે ॥ ૫॥

કેન વિજ્ઞાનયોગેન મતિશ્ચિત્તં સમાસ્થિતા ।
સમુન્નીતા નાધ્યગચ્છત્કો વૈનાં પ્રતિષેધતિ ॥ ૬॥

બ્રાહ્મણ ઉવાચ

તામપાનઃ પતિર્ભૂત્વા તસ્માત્પ્રેષ્યત્યપાનતામ્ ।
તાં મતિં મનસઃ પ્રાહુર્મનસ્તસ્માદવેક્ષતે ॥ ૭॥

પ્રશ્નં તુ વાઙ્મનસોર્માં યસ્માત્ત્વમનુપૃચ્છસિ ।
તસ્માત્તે વર્તયિષ્યામિ તયોરેવ સમાહ્વયમ્ ॥ ૮॥

ઉભે વાઙ્મનસી ગત્વા ભૂતાત્માનમપૃચ્છતામ્ ।
આવયોઃ શ્રેષ્ઠમાચક્ષ્વ છિન્ધિ નૌ સંશયં વિભો ॥ ૯॥

મન ઇત્યેવ ભગવાંસ્તદા પ્રાહ સરસ્વતીમ્ ।
અહં વૈ કામધુક્તુભ્યમિતિ તં પ્રાહ વાગથ ॥ ૧૦॥

સ્થાવરં જઙ્ગમં ચૈવ વિદ્ધ્યુભે મનસી મમ ।
સ્થાવરં મત્સકાશે વૈ જઙ્ગમં વિષયે તવ ॥ ૧૧॥

યસ્તુ તે વિષયં ગચ્છેન્મન્ત્રો વર્ણઃ સ્વરોઽપિ વા ।
તન્મનો જઙ્ગમં નામ તસ્માદસિ ગરીયસી ॥ ૧૨॥

યસ્માદસિ ચ મા વોચઃ સ્વયમભ્યેત્ય શોભને ।
તસ્માદુચ્છ્વાસમાસાદ્ય ન વક્ષ્યસિ સરસ્વતિ ॥ ૧૩॥

પ્રાણાપાનાન્તરે દેવી વાગ્વૈ નિત્યં સ્મ તિષ્ઠતિ ।
પ્રેર્યમાણા મહાભાગે વિના પ્રાણમપાનતી ।
પ્રજાપતિમુપાધાવત્પ્રસીદ ભગવન્નિતિ ॥ ૧૪॥

તતઃ પ્રાણઃ પ્રાદુરભૂદ્વાચમાપ્યાયયન્પુનઃ ।
તમાદુચ્છ્વાસમાસાદ્ય ન વાગ્વદતિ કર્હિ ચિત્ ॥ ૧૫॥

ઘોષિણી જાતનિર્ઘોષા નિત્યમેવ પ્રવર્તતે ।
તયોરપિ ચ ઘોષિણ્યોર્નિર્ઘોષૈવ ગરીયસી ॥ ૧૬॥

ગૌરિવ પ્રસ્રવત્યેષા રસમુત્તમશાલિની ।
સતતં સ્યન્દતે હ્યેષા શાશ્વતં બ્રહ્મવાદિની ॥ ૧૭॥

દિવ્યાદિવ્ય પ્રભાવેન ભારતી ગૌઃ શુચિસ્મિતે ।
એતયોરન્તરં પશ્ય સૂક્ષ્મયોઃ સ્યન્દમાનયોઃ ॥ ૧૮॥

અનુત્પન્નેષુ વાક્યેષુ ચોદ્યમાના સિસૃક્ષયા ।
કિં નુ પૂર્વં તતો દેવી વ્યાજહાર સરસ્વતી ॥ ૧૯॥

પ્રાણેન યા સમ્ભવતે શરીરે
પ્રાણાદપાનમ્પ્રતિપદ્યતે ચ ।
ઉદાન ભૂતા ચ વિસૃજ્ય દેહં
વ્યાનેન સર્વં દિવમાવૃણોતિ ॥ ૨૦॥

તતઃ સમાને પ્રતિતિષ્ઠતીહ
ઇત્યેવ પૂર્વં પ્રજજલ્પ ચાપિ ।
તસ્માન્મનઃ સ્થાવરત્વાદ્વિશિષ્ટં

તથા દેવી જઙ્ગમત્વાદ્વિશિષ્ટા ॥ ૨૧॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ એકવિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૨

બ્રાહ્મણ ઉવાચ

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
સુભગે સપ્ત હોતૄણાં વિધાનમિહ યાદૃશમ્ ॥ ૧॥

ઘ્રાણં ચક્ષુશ્ચ જિહ્વા ચ ત્વક્શ્રોત્રં ચૈવ પઞ્ચમમ્ ।
મનો બુદ્ધિશ્ચ સપ્તૈતે હોતારઃ પૃથગાશ્રિતાઃ ॥ ૨॥

સૂક્ષ્મેઽવકાશે સન્તસ્તે ન પશ્યન્તીતરેતરમ્ ।
એતાન્વૈ સપ્ત હોતૄંસ્ત્વં સ્વભાવાદ્વિદ્ધિ શોભને ॥ ૩॥

બ્રાહ્મણ્યુવાચ

સૂક્ષ્મેઽવકાશે સન્તસ્તે કથં નાન્યોન્ય દર્શિનઃ ।
કથં સ્વભાવા ભગવન્નેતદાચક્ષ્વ મે વિભો ॥ ૪॥

બ્રાહ્મણ ઉવાચ

ગુણાજ્ઞાનમવિજ્ઞાનં ગુણિ જ્ઞાનમભિજ્ઞતા ।
પરસ્પરગુણાનેતે ન વિજાનન્તિ કર્હિ ચિત્ ॥ ૫॥

જિહ્વા ચક્ષુસ્તથા શ્રોત્રં ત્વન્મનો બુદ્ધિરેવ ચ ।
ન ગન્ધાનધિગચ્છન્તિ ઘ્રાણસ્તાનધિગચ્છતિ ॥ ૬॥

ઘ્રાણં ચક્ષુસ્તથા શ્રોત્રં ત્વન્મનો બુદ્ધિરેવ ચ ।
ન રસાનધિગચ્છન્તિ જિહ્વા તાનદિધચ્છતિ ॥ ૭॥

ઘ્રાણં જિહ્વા તથા શ્રોત્રં ત્વન્મનો બુદ્ધિરેવ ચ ।
ન રૂપાણ્યધિગચ્છન્તિ ચક્ષુસ્તાન્યધિગચ્છતિ ॥ ૮॥

ઘ્રાણં જિહ્વા ચ ચક્ષુશ્ચ શ્રોત્રં બુદ્ધિર્મનસ્તથા ।
ન સ્પર્શાનધિગચ્છન્તિ ત્વક્ચ તાનધિગચ્છતિ ॥ ૯॥

ઘ્રાણં જિહ્વા ચ ચક્ષુશ્ ચ ત્વન્મનો બુદ્ધિરેવ ચ ।
ન શબ્દાનધિગચ્છન્તિ શ્રોત્રં તાનધિગચ્છતિ ॥ ૧૦॥

ઘ્રાણં જિહ્વા ચ ચક્ષુશ્ચ ત્વક્શ્રોત્રં બુદ્ધિરેવ ચ ।

સંશયાન્નાધિગચ્છન્તિ મનસ્તાનધિગચ્છતિ ॥ ૧૧॥

ઘ્રાણં જિહ્વા ચ ચક્ષુશ્ચ ત્વક્શ્રોત્રં મન એવ ચ ।
ન નિષ્ઠામધિગચ્છન્તિ બુદ્ધિસ્તામ્ અધિગચ્છતિ ॥ ૧૨॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
ઇન્દ્રિયાણાં ચ સંવાદં મનસશ્ચૈવ ભામિનિ ॥ ૧૩॥

મન ઉવાચ
ન ઘ્રાતિ મામૃતે ઘ્રાણં રસં જિહ્વા ન બુધ્યતે ।
રૂપં ચક્ષુર્ન ગૃહ્ણાતિ ત્વક્સ્પર્શં નાવબુધ્યતે ॥ ૧૪॥

ન શ્રોત્રં બુધ્યતે શબ્દં મયા હીનં કથં ચન ।
પ્રવરં સર્વભૂતાનામહમસ્મિ સનાતનમ્ ॥ ૧૫॥

અગારાણીવ શૂન્યાનિ શાન્તાર્ચિષ ઇવાગ્નયઃ ।
ઇન્દ્રિયાણિ ન ભાસન્તે મયા હીનાનિ નિત્યશઃ ॥ ૧૬॥

કાષ્ઠાનીવાર્દ્ર શુષ્કાણિ યતમાનૈરપીન્દ્રિયૈઃ ।
ગુણાર્થાન્નાધિગચ્છન્તિ મામૃતે સર્વજન્તવઃ ॥ ૧૭॥

ઇન્દ્રિયાણ્યૂચુઃ
એવમેતદ્ભવેત્સત્યં યથૈતન્મન્યતે ભવાન્ ।
ઋતેઽસ્માનસ્મદર્થાંસ્તુ ભોગાન્ભુઙ્ક્તે ભવાન્યદિ ॥ ૧૮॥

યદ્યસ્માસુ પ્રલીનેષુ તર્પણં પ્રાણધારણમ્ ।
ભોગાન્ભુઙ્ક્તે રસાન્ભુઙ્ક્તે યથૈતન્મન્યતે તથા ॥ ૧૯॥

અથ વાસ્માસુ લીનેષુ તિષ્ઠત્સુ વિષયેષુ ચ ।
યદિ સઙ્કલ્પમાત્રેણ ભુઙ્ક્તે ભોગાન્યથાર્થવત્ ॥ ૨૦॥

અથ ચેન્મન્યસે સિદ્ધિમસ્મદર્થેષુ નિત્યદા ।
ઘ્રાણેન રૂપમાદત્સ્વ રસમાદત્સ્વ ચક્ષુષા ॥ ૨૧॥

શ્રોત્રેણ ગન્ધમાદત્સ્વ નિષ્ઠામાદત્સ્વ જિહ્વયા ।
ત્વચા ચ શબ્દમાદત્સ્વ બુદ્ધ્યા સ્પર્શમથાપિ ચ ॥ ૨૨॥

બલવન્તો હ્યનિયમા નિયમા દુર્બલીયસામ્ ।
ભોગાનપૂર્વાનાદત્સ્વ નોચ્છિષ્ટં ભોક્તુમર્હસિ ॥ ૨૩॥

યથા હિ શિષ્યઃ શાસ્તારં શ્રુત્યર્થમભિધાવતિ ।

તતઃ શ્રુતમુપાદાય શ્રુતાર્થમુપતિષ્ઠતિ ॥ ૨૪॥

વિષયાનેવમસ્માભિર્દર્શિતાનભિમન્યસે ।
અનાગતાનતીતાંશ્ચ સ્વપ્ને જાગરણે તથા ॥ ૨૫॥

વૈમનસ્યં ગતાનાં ચ જન્તૂનામલ્પચેતસામ્ ।
અસ્મદર્થે કૃતે કાર્યે દૃશ્યતે પ્રાણધારણમ્ ॥ ૨૬॥

બહૂનપિ હિ સઙ્કલ્પાન્મત્વા સ્વપ્નાનુપાસ્ય ચ ।
બુભુક્ષયા પીડ્યમાનો વિષયાનેવ ધાવસિ ॥ ૨૭॥

અગારમદ્વારમિવ પ્રવિશ્ય
સઙ્કલ્પભોગો વિષયાનવિન્દન્ ।
પ્રાણક્ષયે શાન્તિમુપૈતિ નિત્યં
દારુ ક્ષયેઽગ્નિર્જ્વલિતો યથૈવ ॥ ૨૮॥

કામં તુ નઃ સ્વેષુ ગુણેષુ સઙ્ગઃ
કામચ નાન્યોન્ય ગુણોપલબ્ધિઃ ।
અસ્માનૃતે નાસ્તિ તવોપલબ્ધિસ્
ત્વામપ્યૃતેઽસ્માન્ન ભજેત હર્ષઃ ॥ ૨૯॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ દ્વાવિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૩

બ્રાહ્મણ ઉવાચ

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
સુભગે પઞ્ચ હોતૄણાં વિધાનમિહ યાદૃશમ્ ॥ ૧॥

પ્રાણાપાનાવુદાનશ્ચ સમાનો વ્યાન એવ ચ ।
પઞ્ચ હોતૄનથૈતાન્વૈ પરં ભાવં વિદુર્બુધાઃ ॥ ૨॥

બ્રાહ્મણ્યુવાચ

સ્વભાવાત્સપ્ત હોતાર ઇતિ તે પૂર્વિકા મતિઃ ।
યથા વૈ પઞ્ચ હોતારઃ પરો ભાવસ્તથોચ્યતામ્ ॥ ૩॥

બ્રાહ્મણ ઉવાચ

પ્રાણેન સમ્ભૃતો વાયુરપાનો જાયતે તતઃ ।
અપાને સમ્ભૃતો વાયુસ્તતો વ્યાનઃ પ્રવર્તતે ॥ ૪॥

વ્યાનેન સમ્ભૃતો વાયુસ્તદોદાનઃ પ્રવર્તતે ।
ઉદાને સમ્ભૃતો વાયુઃ સમાનઃ સમ્પ્રવર્તતે ॥ ૫॥

તેઽપૃચ્છન્ત પુરા ગત્વા પૂર્વજાતં પ્રજાપતિમ્ ।
યો નો જ્યેષ્ઠસ્તમાચક્ષ્વ સ નઃ શ્રેષ્ઠો ભવિષ્યતિ ॥ ૬॥

બ્રહ્મોવાચ
યસ્મિન્પ્રલીને પ્રલયં વ્રજન્તિ
સર્વે પ્રાણાઃ પ્રાણભૃતાં શરીરે ।
યસ્મિન્પ્રચીર્ણે ચ પુનશ્ ચરન્તિ
સ વૈ શ્રેષ્ઠો ગચ્છત યત્ર કામઃ ॥ ૭॥

પ્રાણ ઉવાચ
મયિ પ્રલીને પ્રલયં વ્રજન્તિ
સર્વે પ્રાણાઃ પ્રાણભૃતાં શરીરે ।
મયિ પ્રચીર્ણે ચ પુનશ્ ચરન્તિ
શ્રેષ્ઠો હ્યહં પશ્યત માં પ્રલીનમ્ ॥ ૮॥

બ્રાહ્મણ ઉવાચ
પ્રાણઃ પ્રલીયત તતઃ પુનશ્ચ પ્રચચાર હ ।
સમાનશ્ચાપ્યુદાનશ્ચ વચોઽબ્રૂતાં તતઃ શુભે ॥ ૯॥

ન ત્વં સર્વમિદં વ્યાપ્ય તિષ્ઠસીહ યથા વયમ્ ।
ન ત્વં શ્રેષ્ઠોઽસિ નઃ પ્રાણ અપાનો હિ વશે તવ ।
પ્રચચાર પુનઃ પ્રાણસ્તમપાનોઽભ્યભાષત ॥ ૧૦॥

મયિ પ્રલીને પ્રલયં વ્રજન્તિ
સર્વે પ્રાણાઃ પ્રાણભૃતાં શરીરે ।
મયિ પ્રચીર્ણે ચ પુનશ્ ચરન્તિ
શ્રેષ્ઠો હ્યહં પશ્યત માં પ્રલીનમ્ ॥ ૧૧॥

વ્યાનશ્ચ તમુદાનશ્ચ ભાષમાણમથોચતુઃ ।
અપાન ન ત્વં શ્રેષ્ઠોઽસિ પ્રાણો હિ વશગસ્તવ ॥ ૧૨॥

અપાનઃ પ્રચચારાથ વ્યાનસ્તં પુનરબ્રવીત્ ।
શ્રેષ્ઠોઽહમસ્મિ સર્વેષાં શ્રૂયતાં યેન હેતુના ॥ ૧૩॥

મયિ પ્રલીને પ્રલયં વ્રજન્તિ
સર્વે પ્રાણાઃ પ્રાણભૃતાં શરીરે ।
મયિ પ્રચીર્ણે ચ પુનશ્ ચરન્તિ
શ્રેષ્ઠો હ્યહં પશ્યત માં પ્રલીનમ્ ॥ ૧૪॥

પ્રાલીયત તતો વ્યાનઃ પુનશ્ચ પ્રચચાર હ ।
પ્રાણાપાનાવુદાનશ્ચ સમાનશ્ ચ તમબ્રુવન્ ।
ન ત્વં શ્રેષ્ઠોઽસિ નો વ્યાન સમાનો હિ વશે તવ ॥ ૧૫॥

પ્રચચાર પુનર્વ્યાનઃ સમાનઃ પુનરબ્રવીત્ ।
શ્રેષ્ઠોઽહમસ્મિ સર્વેષાં શ્રૂયતાં યેન હેતુના ॥ ૧૬॥

મયિ પ્રલીને પ્રલયં વ્રજન્તિ
સર્વે પ્રાણાઃ પ્રાણભૃતાં શરીરે ।
મયિ પ્રચીર્ણે ચ પુનશ્ ચરન્તિ
શ્રેષ્ઠો હ્યહં પશ્યત માં પ્રલીનમ્ ॥ ૧૭॥

તતઃ સમાનઃ પ્રાલિલ્યે પુનશ્ચ પ્રચચાર હ ।
પ્રાણાપાનાવુદાનશ્ચ વ્યાનશ્ ચૈવ તમબ્રુવન્ ।
સમાનન ત્વં શ્રેષ્ઠોઽસિ વ્યાન એવ વશે તવ ॥ ૧૮॥

સમાનઃ પ્રચચારાથ ઉદાનસ્તમુવાચ હ ।
શ્રેષ્ઠોઽહમસ્મિ સર્વેષાં શ્રૂયતાં યેન હેતુના ॥ ૧૯॥

મયિ પ્રલીને પ્રલયં વ્રજન્તિ
સર્વે પ્રાણાઃ પ્રાણભૃતાં શરીરે ।
મયિ પ્રચીર્ણે ચ પુનશ્ ચરન્તિ
શ્રેષ્ઠો હ્યહં પશ્યત માં પ્રલીનમ્ ॥ ૨૦॥

તતઃ પ્રાલીયતોદાનઃ પુનશ્ચ પ્રચચાર હ ।
પ્રાણાપાનૌ સમાનશ્ચ વ્યાનશ્ ચૈવ તમબ્રુવન્ ।
ઉદાન ન ત્વં શ્રેષ્ઠોઽસિ વ્યાન એવ વશે તવ ॥ ૨૧॥

તતસ્તાનબ્રવીદ્બ્રહ્મા સમવેતાન્પ્રજાપતિઃ ।
સર્વે શ્રેષ્ઠા ન વા શ્રેષ્ઠાઃ સર્વે ચાન્યોન્ય ધર્મિણઃ ।
સર્વે સ્વવિષયે શ્રેષ્ઠાઃ સર્વે ચાન્યોન્ય રક્ષિણઃ ॥ ૨૨॥

એકઃ સ્થિરશ્ચાસ્થિરશ્ચ વિશેષાત્પઞ્ચ વાયવઃ ।

એક એવ મમૈવાત્મા બહુધાપ્યુપચીયતે ॥ ૨૩॥

પરસ્પરસ્ય સુહૃદો ભાવયન્તઃ પરસ્પરમ્ ।
સ્વસ્તિ વ્રજત ભદ્રં વો ધારયધ્વં પરસ્પરમ્ ॥ ૨૪॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ ત્રયોવિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૪

બ્રાહ્મણ ઉવાચ

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
નારદસ્ય ચ સંવાદમૃષેર્દેવમતસ્ય ચ ॥ ૧॥

દેવમત ઉવાચ

જન્તોઃ સઞ્જાયમાનસ્ય કિં નુ પૂર્વં પ્રવર્તતે ।
પ્રાણોઽપાનઃ સમાનો વા વ્યાનો વોદાન એવ ચ ॥ ૨॥

નારદ ઉવાચ

યેનાયં સૃજ્યતે જન્તુસ્તતોઽન્યઃ પૂર્વમેતિ તમ્ ।
પ્રાણદ્વન્દ્વં ચ વિજ્ઞેયં તિર્યગં ચોર્ધ્વગં ચ યત્ ॥ ૩॥

દેવમત ઉવાચ

કેનાયં સૃજ્યતે જન્તુઃ કશ્ચાન્યઃ પૂર્વમેતિ તમ્ ।
પ્રાણદ્વન્દ્વં ચ મે બ્રૂહિ તિર્યગૂર્ધ્વં ચ નિશ્ચયાત્ ॥ ૪॥

નારદ ઉવાચ

સઙ્કલ્પાજ્જાયતે હર્ષઃ શબ્દાદપિ ચ જાયતે ।
રસાત્સઞ્જાયતે ચાપિ રૂપાદપિ ચ જાયતે ॥ ૫॥

સ્પર્શાત્સઞ્જાયતે ચાપિ ગન્ધાદપિ ચ જાયતે ।
એતદ્રૂપમુદાનસ્ય હર્ષો મિથુન સમ્ભવઃ ॥ ૬॥

કામાત્સઞ્જાયતે શુક્રં કામાત્સઞ્જાયતે રસઃ ।
સમાનવ્યાન જનિતે સામાન્યે શુક્રશોણિતે ॥ ૭॥

શુક્રાચ્છોણિત સંસૃષ્ટાત્પૂર્વં પ્રાણઃ પ્રવર્તતે ।
પ્રાણેન વિકૃતે શુક્રે તતોઽપાનઃ પ્રવર્તતે ॥ ૮॥

પ્રાણાપાનાવિદં દ્વન્દ્વમવાક્ચોર્ધ્વં ચ ગચ્છતઃ ।

વ્યાનઃ સમાનશ્ચૈવોભૌ તિર્યગ્દ્વન્દ્વત્વમુચ્યતે ॥ ૯॥

અગ્નિર્વૈ દેવતાઃ સર્વા ઇતિ વેદસ્ય શાસનમ્ ।
સઞ્જાયતે બ્રાહ્મણેષુ જ્ઞાનં બુદ્ધિસમન્વિતમ્ ॥ ૧૦॥

તસ્ય ધૂમસ્તમો રૂપં રજો ભસ્મ સુરેતસઃ ।
સત્ત્વં સઞ્જાયતે તસ્ય યત્ર પ્રક્ષિપ્યતે હવિઃ ॥ ૧૧॥

આઘારૌ સમાનો વ્યાનશ્ચેતિ યજ્ઞવિદો વિદુઃ ।
પ્રાણાપાનાવાજ્યભાગૌ તયોર્મધ્યે હુતાશનઃ ।
એતદ્રૂપમુદાનસ્ય પરમં બ્રાહ્મણા વિદુઃ ॥ ૧૨॥

નિર્દ્વન્દ્વમિતિ યત્ત્વેતત્તન્મે નિગદતઃ શ‍ૃણુ ॥ ૧૩॥

અહોરાત્રમિદં દ્વન્દ્વં તયોર્મધ્યે હુતાશનઃ ।
એતદ્રૂપમુદાનસ્ય પરમં બ્રાહ્મણા વિદુઃ ॥ ૧૪॥

ઉભે ચૈવાયને દ્વન્દ્વં તયોર્મધ્યે હુતાશનઃ ।
એતદ્રૂપમુદાનસ્ય પરમં બ્રાહ્મણા વિદુઃ ॥ ૧૫॥

ઉભે સત્યાનૃતે દ્વન્દ્વં તયોર્મધ્યે હુતાશનઃ ।
એતદ્રૂપમુદાનસ્ય પરમં બ્રાહ્મણા વિદુઃ ॥ ૧૬॥

ઉભે શુભાશુભે દ્વન્દ્વં તયોર્મધ્યે હુતાશનઃ ।
એતદ્રૂપમુદાનસ્ય પરમં બ્રાહ્મણા વિદુઃ ॥ ૧૭॥

સચ્ચાસચ્ચૈવ તદ્દ્વન્દ્વં તયોર્મધ્યે હુતાશનઃ ।
એતદ્રૂપમુદાનસ્ય પરમં બ્રાહ્મણા વિદુઃ ॥ ૧૮॥

પ્રથમં સમાનો વ્યાનો વ્યસ્યતે કર્મ તેન તત્ ।
તૃતીયં તુ સમાનેન પુનરેવ વ્યવસ્યતે ॥ ૧૯॥

શાન્ત્યર્થં વામદેવં ચ શાન્તિર્બ્રહ્મ સનાતનમ્ ।
એતદ્રૂપમુદાનસ્ય પરમં બ્રાહ્મણા વિદુઃ ॥ ૨૦॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ ચતુર્વિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૫

બ્રાહ્મણ ઉવાચ

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।

ચાતુર્હોત્ર વિધાનસ્ય વિધાનમિહ યાદૃશમ્ ॥ ૧॥

તસ્ય સર્વસ્ય વિધિવદ્વિધાનમુપદેક્ષ્યતે ।
શ‍ૃણુ મે ગદતો ભદ્રે રહસ્યમિદમુત્તમમ્ ॥ ૨॥

કરણં કર્મ કર્તા ચ મોક્ષ ઇત્યેવ ભામિનિ ।
ચત્વાર એતે હોતારો યૈરિદં જગદાવૃતમ્ ॥ ૩॥

હોતૃણાં સાધનં ચૈવ શ‍ૃણુ સર્વમશેષતઃ ।
ઘ્રાણં જિહ્વા ચ ચક્ષુશ્ચ ત્વક્ચ શ્રોત્રં ચ પઞ્ચમમ્ ।
મનો બુદ્ધિશ્ચ સપ્તૈતે વિજ્ઞેયા ગુણહેતવઃ ॥ ૪॥

ગન્ધો રસશ્ચ રૂપં ચ શબ્દઃ સ્પર્શશ્ચ પઞ્ચમઃ ।
મન્તવ્યમથ બોદ્ધવ્યં સપ્તૈતે કર્મહેતવઃ ॥ ૫॥

ઘ્રાતા ભક્ષયિતા દ્રષ્ટા સ્પ્રષ્ટા શ્રોતા ચ પઞ્ચમઃ ।
મન્તા બોદ્ધા ચ સપ્તૈતે વિજ્ઞેયાઃ કર્તૃહેતવઃ ॥ ૬॥

સ્વગુણં ભક્ષયન્ત્યેતે ગુણવન્તઃ શુભાશુભમ્ ।
અહં ચ નિર્ગુણોઽત્રેતિ સપ્તૈતે મોક્ષહેતવઃ ॥ ૭॥

વિદુષાં બુધ્યમાનાનાં સ્વં સ્વસ્થાનં યથાવિધિ ।
ગુણાસ્તે દેવતા ભૂતાઃ સતતં ભુઞ્જતે હવિઃ ॥ ૮॥

અદન્હ્યવિદ્વાનન્નાનિ મમત્વેનોપપદ્યતે ।
આત્માર્થં પાચયન્નિત્યં મમત્વેનોપહન્યતે ॥ ૯॥

અભક્ષ્ય ભક્ષણં ચૈવ મદ્ય પાનં ચ હન્તિ તમ્ ।
સ ચાન્નં હન્તિ તચ્ચાન્નં સ હત્વા હન્યતે બુધઃ ॥ ૧૦॥

અત્તા હ્યન્નમિદં વિદ્વાન્પુનર્જનયતીશ્વરઃ ।
સ ચાન્નાજ્જાયતે તસ્મિન્સૂક્ષ્મો નામ વ્યતિક્રમઃ ॥ ૧૧॥

મનસા ગમ્યતે યચ્ચ યચ્ચ વાચા નિરુધ્યતે ।
શ્રોત્રેણ શ્રૂયતે યચ્ચ ચક્ષુષા યચ્ચ દૃશ્યતે ॥ ૧૨॥

સ્પર્શેન સ્પૃશ્યતે યચ્ચ ઘ્રાણેન ઘ્રાયતે ચ યત્ ।
મનઃષષ્ઠાનિ સંયમ્ય હવીંષ્યેતાનિ સર્વશઃ ॥ ૧૩॥

ગુણવત્પાવકો મહ્યં દીપ્યતે હવ્યવાહનઃ ।
યોગયજ્ઞઃ પ્રવૃત્તો મે જ્ઞાનબ્રહ્મ મનોદ્ભવઃ ।

પ્રાણસ્તોત્રોઽપાન શસ્ત્રઃ સર્વત્યાગસુ દક્ષિણઃ ॥ ૧૪॥

કર્માનુમન્તા બ્રહ્મા મે કર્તાધ્વર્યુઃ કૃતસ્તુતિઃ ।
કૃતપ્રશાસ્તા તચ્છાસ્ત્રમપવર્ગોઽસ્ય દક્ષિણા ॥ ૧૫॥

ઋચશ્ચાપ્યત્ર શંસન્તિ નારાયણ વિદો જનાઃ ।
નારાયણાય દેવાય યદબધ્નન્પશૂન્પુરા ॥ ૧૬॥

તત્ર સામાનિ ગાયન્તિ તાનિ ચાહુર્નિદર્શનમ્ ।
દેવં નારાયણં ભીરુ સર્વાત્માનં નિબોધ મે ॥ ૧૭॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ પઞ્ચવિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૬

બ્રાહ્મણ ઉવાચ

એકઃ શાસ્તા ન દ્વિતીયોઽસ્તિ શાસ્તા
યથા નિયુક્તોઽસ્મિ તથા ચરામિ ।
હૃદ્યેષ તિષ્ઠન્પુરુષઃ શાસ્તિ શાસ્તા
તેનૈવ યુક્તઃ પ્રવણાદિવોદકમ્ ॥ ૧॥

એકો ગુરુર્નાસ્તિ તતો દ્વિતીયો
યો હૃચ્છયસ્તમહમનુબ્રવીમિ ।
તેનાનુશિષ્ટા ગુરુણા સદૈવ
પરાભૂતા દાનવાઃ સર્વ એવ ॥ ૨॥

એકો બન્ધુર્નાસ્તિ તતો દ્વિતીયો
યો હૃચ્છયસ્તમહમનુબ્રવીમિ ।
તેનાનુશિષ્ટા બાન્ધવા બન્ધુમન્તઃ
સપ્તર્ષયઃ સપ્ત દિવિ પ્રભાન્તિ ॥ ૩॥

એકઃ શ્રોતા નાસ્તિ તતો દ્વિતીયો
યો હૃચ્છયસ્તમહમનુબ્રવીમિ ।
તસ્મિન્ગુરૌ ગુરુ વાસં નિરુષ્ય
શક્રો ગતઃ સર્વલોકામરત્વમ્ ॥ ૪॥

એકો દ્વેષ્ટા નાસ્તિ તતો દ્વિતીયો
યો હૃચ્છયસ્તમહમનુબ્રવીમિ ।

તેનાનુશિષ્ટા ગુરુણા સદૈવ
લોકદ્વિષ્ટાઃ પન્નગાઃ સર્વ એવ ॥ ૫॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
પ્રજાપતૌ પન્નગાનાં દેવર્ષીણાં ચ સંવિદમ્ ॥ ૬॥

દેવર્ષયશ્ચ નાગાશ્ચ અસુરાશ્ચ પ્રજાપતિમ્ ।
પર્યપૃચ્છન્નુપાસીનાઃ શ્રેયો નઃ પ્રોચ્યતામ્ ઇતિ ॥ ૭॥

તેષાં પ્રોવાચ ભગવાઞ્શ્રેયઃ સમનુપૃચ્છતામ્ ।
ઓમિત્યેકાક્ષરં બ્રહ્મ તે શ્રુત્વા પ્રાદ્રવન્દિશઃ ॥ ૮॥

તેષાં પ્રાદ્રવમાણાનામુપદેશાર્થમાત્મનઃ ।
સર્પાણાં દશને ભાવઃ પ્રવૃત્તઃ પૂર્વમેવ તુ ॥ ૯॥

અસુરાણાં પ્રવૃત્તસ્તુ દમ્ભભાવઃ સ્વભાવજઃ ।
દાનં દેવા વ્યવસિતા દમમેવ મહર્ષયઃ ॥ ૧૦॥

એકં શાસ્તારમાસાદ્ય શબ્દેનૈકેન સંસ્કૃતાઃ ।
નાના વ્યવસિતાઃ સર્વે સર્પદેવર્ષિદાનવાઃ ॥ ૧૧॥

શ૰ૃણોત્યયં પ્રોચ્યમાનં ગૃહ્ણાતિ ચ યથાતથમ્ ।
પૃચ્છતસ્તાવતો ભૂયો ગુરુરન્યોઽનુમન્યતે ॥ ૧૨॥

તસ્ય ચાનુમતે કર્મ તતઃ પશ્ચાત્પ્રવર્તતે ।
ગુરુર્બોદ્ધા ચ શત્રુશ્ચ દ્વેષ્ટા ચ હૃદિ સંશ્રિતઃ ॥ ૧૩॥

પાપેન વિચરઁલ્લોકે પાપચારી ભવત્યયમ્ ।
શુભેન વિચરઁલ્લોકે શુભચારી ભવત્યુત ॥ ૧૪॥

કામચારી તુ કામેન ય ઇન્દ્રિયસુખે રતઃ ।
વ્રતવારી સદૈવૈષ ય ઇન્દ્રિયજયે રતઃ ॥ ૧૫॥

અપેતવ્રતકર્મા તુ કેવલં બ્રહ્મણિ શ્રિતઃ ।
બ્રહ્મભૂતશ્ચરઁલ્લોકે બ્રહ્મ ચારી ભવત્યયમ્ ॥ ૧૬॥

બ્રહ્મૈવ સમિધસ્તસ્ય બ્રહ્માગ્નિર્બ્રહ્મ સંસ્તરઃ ।
આપો બ્રહ્મ ગુરુર્બ્રહ્મ સ બ્રહ્મણિ સમાહિતઃ ॥ ૧૭॥

એતદેતાદૃશં સૂક્ષ્મં બ્રહ્મચર્યં વિદુર્બુધાઃ ।
વિદિત્વા ચાન્વપદ્યન્ત ક્ષેત્રજ્ઞેનાનુદર્શિનઃ ॥ ૧૮॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ ષડ્વિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૭

બ્રાહ્મણ ઉવાચ

સઙ્કલ્પદંશ મશકં શોકહર્ષહિમાતપમ્ ।
મોહાન્ધ કારતિમિરં લોભવ્યાલ સરીસૃપમ્ ॥ ૧॥

વિષયૈકાત્યયાધ્વાનં કામક્રોધવિરોધકમ્ ।
તદતીત્ય મહાદુર્ગં પ્રવિષ્ટોઽસ્મિ મહદ્વનમ્ ॥ ૨॥

બ્રાહ્મણ્યુવાચ

ક્વ તદ્વનં મહાપ્રાજ્ઞ કે વૃક્ષાઃ સરિતશ્ચ કાઃ ।
ગિરયઃ પર્વતાશ્ ચૈવ કિયત્યધ્વનિ તદ્વનમ્ ॥ ૩॥

ન તદસ્તિ પૃથગ્ભાવે કિં ચિદન્યત્તતઃ સમમ્ ।
ન તદસ્ત્યપૃથગ્ભાવે કિં ચિદ્દૂરતરં તતઃ ॥ ૪॥

તસ્માદ્ધ્રસ્વતરં નાસ્તિ ન તતોઽસ્તિ બૃહત્તરમ્ ।
નાસ્તિ તસ્માદ્દુઃખતરં નાસ્ત્યન્યત્તત્સમં સુખમ્ ॥ ૫॥

ન તત્પ્રવિશ્ય શોચન્તિ ન પ્રહૃષ્યન્તિ ચ દ્વિજાઃ ।
ન ચ બિભ્યતિ કેષાં ચિત્તેભ્યો બિભ્યતિ કે ચ ન ॥ ૬॥

તસ્મિન્વને સપ્ત મહાદ્રુમાશ્ ચ
ફલાનિ સપ્તાતિથયશ્ ચ સપ્ત ।
સપ્તાશ્રમાઃ સપ્ત સમાધયશ્ ચ
દીક્ષાશ્ચ સપ્તૈતદરણ્યરૂપમ્ ॥ ૭॥

પઞ્ચ વર્ણાનિ દિવ્યાનિ પુષ્પાણિ ચ ફલાનિ ચ ।
સૃજન્તઃ પાદપાસ્તત્ર વ્યાપ્ય તિષ્ઠન્તિ તદ્વનમ્ ॥ ૮॥

સુવર્ણાનિ દ્વિવર્ણાનિ પુષ્પાણિ ચ ફલાનિ ચ ।
સૃજન્તઃ પાદપાસ્તત્ર વ્યાપ્ય તિષ્ઠન્તિ તદ્વનમ્ ॥ ૯॥

ચતુર્વર્ણાણિ દિવ્યાનિ પુષ્પાણિ ચ ફલાનિ ચ ।
સૃજન્તઃ પાદપાસ્તત્ર વ્યાપ્ય તિષ્ઠન્તિ તદ્વનમ્ ॥ ૧૦॥

શઙ્કુરાણિત્રિ વર્ણાનિ પુષ્પાણિ ચ ફલાનિ ચ ।
સૃજન્તઃ પાદપાસ્તત્ર વ્યાપ્ય તિષ્ઠન્તિ તદ્વનમ્ ॥ ૧૧॥

સુરભીણ્યેકવર્ણાનિ પુષ્પાણિ ચ ફલાનિચ ।
સૃજન્તઃ પાદપાસ્તત્ર વ્યાપ્ય તિષ્ઠન્તિ તદ્વનમ્ ॥ ૧૨॥

બહૂન્યવ્યક્તવર્ણાનિ પુષ્પાણિ ચ ફલાનિચ ।
વિસૃજન્તૌ મહાવૃક્ષૌ તદ્વનં વ્યાપ્ય તિષ્ઠતઃ ॥ ૧૩॥

એકો હ્યગ્નિઃ સુમના બ્રાહ્મણોઽત્ર
પઞ્ચેન્દ્રિયાણિ સમિધશ્ચાત્ર સન્તિ ।
તેભ્યો મોક્ષાઃ સપ્ત ભવન્તિ દીક્ષા
ગુણાઃ ફલાન્યતિથયઃ ફલાશાઃ ॥ ૧૪॥

આતિથ્યં પ્રતિગૃહ્ણન્તિ તત્ર સપ્તમહર્ષયઃ ।
અર્ચિતેષુ પ્રલીનેષુ તેષ્વન્યદ્રોચતે વનમ્ ॥ ૧૫॥

પ્રતિજ્ઞા વૃક્ષમફલં શાન્તિચ્છાયા સમન્વિતમ્ ।
જ્ઞાનાશ્રયં તૃપ્તિતોયમન્તઃ ક્ષેત્રજ્ઞભાસ્કરમ્ ॥ ૧૬॥

યોઽધિગચ્છન્તિ તત્સન્તસ્તેષાં નાસ્તિ ભયં પુનઃ ।
ઊર્ધ્વં ચાવાક્ચ તિર્યક્ચ તસ્ય નાન્તોઽધિગમ્યતે ॥ ૧૭॥

સપ્ત સ્ત્રિયસ્તત્ર વસન્તિ સદ્યો
અવાઙ્મુખા ભાનુમત્યો જનિત્ર્યઃ ।
ઊર્ધ્વં રસાનાં દદતે પ્રજાભ્યઃ
સર્વાન્યથા સર્વમનિત્યતાં ચ ॥ ૧૮॥

તત્રૈવ પ્રતિતિષ્ઠન્તિ પુનસ્તત્રોદયન્તિ ચ ।
સપ્ત સપ્તર્ષયઃ સિદ્ધા વસિષ્ઠપ્રમુખાઃ સહ ॥ ૧૯॥

યશો વર્ચો ભગશ્ચૈવ વિજયઃ સિદ્ધિતેજસી ।
એવમેવાનુવર્તન્તે સપ્ત જ્યોતીંષિ ભાસ્કરમ્ ॥ ૨૦॥

ગિરયઃ પર્વતાશ્ચૈવ સન્તિ તત્ર સમાસતઃ ।
નદ્યશ્ચ સરિતો વારિવહન્ત્યો બ્રહ્મ સમ્ભવમ્ ॥ ૨૧॥

નદીનાં સઙ્ગમસ્તત્ર વૈતાનઃ સમુપહ્વરે ।
સ્વાત્મ તૃપ્તા યતો યાન્તિ સાક્ષાદ્દાન્તાઃ પિતામહમ્ ॥ ૨૨॥

કૃશાશાઃ સુવ્રતાશાશ્ચ તપસા દગ્ધકિલ્બિષાઃ ।
આત્મન્યાત્માનમાવેશ્ય બ્રહ્માણં સમુપાસતે ॥ ૨૩॥

ઋચમપ્યત્ર શંસન્તિ વિદ્યારણ્યવિદો જનાઃ ।
તદરણ્યમભિપ્રેત્ય યથા ધીરમજાયત ॥ ૨૪॥

એતદેતાદૃશં દિવ્યમરણ્યં બ્રાહ્મણા વિદુઃ ।
વિદિત્વા ચાન્વતિષ્ઠન્ત ક્ષેત્રજ્ઞેનાનુદર્શિતમ્ ॥ ૨૫॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ સપ્તવિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૮

બ્રાહ્મણ ઉવાચ

ગન્ધાન્ન જિઘ્રામિ રસાન્ન વેદ્મિ
રૂપં ન પશ્યામિ ન ચ સ્પૃશામિ ।
ન ચાપિ શબ્દાન્વિવિધાઞ્શ‌ૃણોમિ
ન ચાપિ સઙ્કલ્પમુપૈમિ કિં ચિત્ ॥ ૧॥

અર્થાનિષ્ટાન્કામયતે સ્વભાવઃ
સર્વાન્દ્વેષ્યાન્પ્રદ્વિષતે સ્વભાવઃ ।
કામદ્વેષાવુદ્ભવતઃ સ્વભાવાત્
પ્રાણાપાનૌ જન્તુ દેહાન્નિવેશ્ય ॥ ૨॥

તેભ્યશ્ચાન્યાંસ્તેષ્વનિત્યાંશ્ચ ભાવાન્
ભૂતાત્માનં લક્ષયેયં શરીરે ।
તસ્મિંસ્તિષ્ઠન્નાસ્મિ શક્યઃ કથં ચિત્
કામક્રોધાભ્યાં જરયા મૃત્યુના ચ ॥ ૩॥

અકામયાનસ્ય ચ સર્વકામાન્
અવિદ્વિષાણસ્ય ચ સર્વદોષાન્ ।
ન મે સ્વભાવેષુ ભવન્તિ લેપાસ્
તોયસ્ય બિન્દોરિવ પુષ્કરેષુ ॥ ૪॥

નિત્યસ્ય ચૈતસ્ય ભવન્તિ નિત્યા
નિરીક્ષમાણસ્ય બહૂન્સ્વભાવાન્ ।
ન સજ્જતે કર્મસુ ભોગજાલં

દિવીવ સૂર્યસ્ય મયૂખજાલમ્ ॥ ૫॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
અધ્વર્યુ યતિ સંવાદં તં નિબોધ યશસ્વિનિ ॥ ૬॥

પ્રોક્ષ્યમાણં પશું દૃષ્ટ્વા યજ્ઞકર્મણ્યથાબ્રવીત્ ।
યતિરધ્વર્યુમાસીનો હિંસેયમિતિ કુત્સયન્ ॥ ૭॥

તમધ્વર્યુઃ પ્રત્યુવાચ નાયં છાગો વિનશ્યતિ ।
શ્રેયસા યોક્ષ્યતે જન્તુર્યદિ શ્રુતિરિયં તથા ॥ ૮॥

યો હ્યસ્ય પાર્થિવો ભાગઃ પૃથિવીં સ ગમિષ્યતિ ।
યદસ્ય વારિજં કિં ચિદપસ્તત્પ્રતિપદ્યતે ॥ ૯॥

સૂર્યં ચક્ષુર્દિશઃ શ્રોત્રે પ્રાણોઽસ્ય દિવમેવ ચ ।
આગમે વર્તમાનસ્ય ન મે દોષોઽસ્તિ કશ્ ચન ॥ ૧૦॥

યતિરુવાચ
પ્રાણૈર્વિયોગે છાગસ્ય યદિ શ્રેયઃ પ્રપશ્યસિ ।
છાગાર્થે વર્તતે યજ્ઞો ભવતઃ કિં પ્રયોજનમ્ ॥ ૧૧॥

અનુ ત્વા મન્યતાં માતા પિતા ભ્રાતા સખાપિ ચ ।
મન્ત્રયસ્વૈનમુન્નીય પરવન્તં વિશેષતઃ ॥ ૧૨॥

ય એવમનુમન્યેરંસ્તાન્ભવાન્પ્રષ્ટુમર્હતિ ।
તેષામનુમતં શ્રુત્વા શક્યા કર્તું વિચારણા ॥ ૧૩॥

પ્રાણા અપ્યસ્ય છાગસ્ય પ્રાપિતાસ્તે સ્વયોનિષુ ।
શરીરં કેવલં શિષ્ટં નિશ્ચેષ્ટમિતિ મે મતિઃ ॥ ૧૪॥

ઇન્ધનસ્ય તુ તુલ્યેન શરીરેણ વિચેતસા ।
હિંસા નિર્વેષ્ટુ કામાનામિન્ધનં પશુસઞ્જ્ઞિતમ્ ॥ ૧૫॥

અહિંસા સર્વધર્માણામિતિ વૃદ્ધાનુશાસનમ્ ।
યદહિંસ્રં ભવેત્કર્મ તત્કાર્યમિતિ વિદ્મહે ॥ ૧૬॥

અહિંસેતિ પ્રતિજ્ઞેયં યદિ વક્ષ્યામ્યતઃ પરમ્ ।
શક્યં બહુવિધં વક્તું ભવતઃ કાર્યદૂષણમ્ ॥ ૧૭॥

અહિંસા સર્વભૂતાનાં નિત્યમસ્માસુ રોચતે ।
પ્રત્યક્ષતઃ સાધયામો ન પરોક્ષમુપાસ્મહે ॥ ૧૮॥

અધ્વર્યુરુવાચ

ભૂમેર્ગન્ધગુણાન્ભુઙ્ક્ષ્વ પિબસ્યાપોમયાન્રસાન્ ।
જ્યોતિષાં પશ્યસે રૂપં સ્પૃશસ્યનિલજાન્ગુણાન્ ॥ ૧૯॥

શ‍ૃણોષ્યાકાશજં શબ્દં મનસા મન્યસે મતિમ્ ।
સર્વાણ્યેતાનિ ભૂતાનિ પ્રાણા ઇતિ ચ મન્યસે ॥ ૨૦॥

પ્રાણાદાને ચ નિત્યોઽસિ હિંસાયાં વર્તતે ભવાન્ ।
નાસ્તિ ચેષ્ટા વિના હિંસાં કિં વા ત્વં મન્યસે દ્વિજ ॥ ૨૧॥

યતિરુવાચ

અક્ષરં ચ ક્ષરં ચૈવ દ્વૈધી ભાવોઽયમાત્મનઃ ।
અક્ષરં તત્ર સદ્ભાવઃ સ્વભાવઃ ક્ષર ઉચ્યતે ॥ ૨૨॥

પ્રાણો જિહ્વા મનઃ સત્ત્વં સ્વભાવો રજસા સહ ।
ભાવૈરેતૈર્વિમુક્તસ્ય નિર્દ્વન્દ્વસ્ય નિરાશિષઃ ॥ ૨૩॥

સમસ્ય સર્વભૂતેષુ નિર્મમસ્ય જિતાત્મનઃ ।
સમન્તાત્પરિમુક્તસ્ય ન ભયં વિદ્યતે ક્વ ચિત્ ॥ ૨૪॥

અધ્વર્યુરુવાચ

સદ્ભિરેવેહ સંવાસઃ કાર્યો મતિમતાં વર ।
ભવતો હિ મતં શ્રુત્વા પ્રતિભાતિ મતિર્મમ ॥ ૨૫॥

ભગવન્ભગવદ્બુદ્ધ્યા પ્રતિબુદ્ધો બ્રવીમ્યહમ્ ।
મતં મન્તું ક્રતું કર્તું નાપરાધોઽસ્તિ મે દ્વિજ ॥ ૨૬॥

બ્રાહ્મણ ઉવાચ

ઉપપત્ત્યા યતિસ્તૂષ્ણીં વર્તમાનસ્તતઃ પરમ્ ।
અધ્વર્યુરપિ નિર્મોહઃ પ્રચચાર મહામખે ॥ ૨૭॥

એવમેતાદૃશં મોક્ષં સુસૂક્ષ્મં બ્રાહ્મણા વિદુઃ ।
વિદિત્વા ચાનુતિષ્ઠન્તિ ક્ષેત્રજ્ઞેનાનુદર્શિના ॥ ૨૮॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ અષ્ટાવિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૨૯

બ્રાહ્મણ ઉવાચ
અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
કાર્તવીર્યસ્ય સંવાદં સમુદ્રસ્ય ચ ભામિનિ ॥ ૧॥

કાર્તવીર્યાર્જુનો નામ રાજા બાહુસહસ્રવાન્ ।
યેન સાગરપર્યન્તા ધનુષા નિર્જિતા મહી ॥ ૨॥

સ કદા ચિત્સમુદ્રાન્તે વિચરન્બલદર્પિતઃ ।
અવાકિરચ્છરશતૈઃ સમુદ્રમિતિ નઃ શ્રુતમ્ ॥ ૩॥

તં સમુદ્રો નમસ્કૃત્ય કૃતાઞ્જલિરુવાચ હ ।
મા મુઞ્ચ વીર નારાચાન્બ્રૂહિ કિં કરવાણિ તે ॥ ૪॥

મદાશ્રયાણિ ભૂતાનિ ત્વદ્વિસૃષ્ટૈર્મહેષુભિઃ ।
વધ્યન્તે રાજશાર્દૂલ તેભ્યો દેહ્યભયં વિભો ॥ ૫॥

અર્જુવ ઉવાચ
મત્સમો યદિ સઙ્ગ્રામે શરાસનધરઃ ક્વ ચિત્ ।
વિદ્યતે તં મમાચક્ષ્વ યઃ સમાસીત માં મૃધે ॥ ૬॥

સમુદ્ર ઉવાચ
મહર્ષિર્જમદગ્નિસ્તે યદિ રાજન્પરિશ્રુતઃ ।
તસ્ય પુત્રસ્તવાતિથ્યં યથાવત્કર્તુમર્હતિ ॥ ૭॥

તતઃ સ રાજા પ્રયયૌ ક્રોધેન મહતા વૃતઃ ।
સ તમાશ્રમમાગમ્ય રમમેવાન્વપદ્યત ॥ ૮॥

સ રામ પ્રતિકૂલાનિ ચકાર સહ બન્ધુભિઃ ।
આયાસં જનયામાસ રામસ્ય ચ મહાત્મનઃ ॥ ૯॥

તતસ્તેજઃ પ્રજજ્વાલ રાજસ્યામિત તેજસઃ ।
પ્રદહદ્રિપુસૈન્યાનિ તદા કમલલોચને ॥ ૧૦॥

તતઃ પરશુમાદાય સ તં બાહુસહસ્રિણમ્ ।
ચિચ્છેદ સહસા રામો બાહુશાખમિવ દ્રુમમ્ ॥ ૧૧॥

તં હતં પતિતં દૃષ્ટ્વા સમેતાઃ સર્વબાન્ધવાઃ ।
અસીનાદાય શક્તીશ્ચ ભાર્ગવં પર્યવારયન્ ॥ ૧૨॥

રામોઽપિ ધનુરાદાય રથમારુહ્ય સ ત્વરઃ ।

વિસૃજઞ્શરવર્ષાણિ વ્યધમત્પાર્થિવં બલમ્ ॥ ૧૩॥

તતસ્તુ ક્ષત્રિયાઃ કે ચિજ્જમદગ્નિં નિહત્ય ચ ।
વિવિશુર્ગિરિદુર્ગાણિ મૃગાઃ સિંહાર્દિતા ઇવ ॥ ૧૪॥

તેષાં સ્વવિહિતં કર્મ તદ્ભયાન્નાનુતિષ્ઠતામ્ ।
પ્રજા વૃષલતાં પ્રાપ્તા બ્રાહ્મણાનામદર્શનાત્ ॥ ૧૫॥

ત એતે દ્રમિડાઃ કાશાઃ પુણ્ડ્રાશ્ચ શબરૈઃ સહ ।
વૃષલત્વં પરિગતા વ્યુત્થાનાત્ક્ષત્રધર્મતઃ ॥ ૧૬॥

તતસ્તુ હતવીરાસુ ક્ષત્રિયાસુ પુનઃ પુનઃ ।
દ્વિજૈરુત્પાદિતં ક્ષત્રં જામદગ્ન્યો ન્યકૃન્તત ॥ ૧૭॥

એવ વિંશતિમેધાન્તે રામં વાગશરીરિણી ।
દિવ્યા પ્રોવાચ મધુરા સર્વલોકપરિશ્રુતા ॥ ૧૮॥

રામ રામ નિવર્તસ્વ કં ગુણં તાત પશ્યસિ ।
ક્ષત્રબન્ધૂનિમાન્પ્રાણૈર્વિપ્રયોજ્ય પુનઃ પુનઃ ॥ ૧૯॥

તથૈવ તં મહાત્માનમૃચીકપ્રમુખાસ્તદા ।
પિતામહા મહાભાગ નિવર્તસ્વેત્યથાબ્રુવન્ ॥ ૨૦॥

પિતુર્વધમમૃષ્યંસ્તુ રામઃ પ્રોવાચ તાનૃષીન્ ।
નાર્હન્તીહ ભવન્તો માં નિવારયિતુમિત્યુત ॥ ૨૧॥

પિતર ઊચુઃ

નાર્હસે ક્ષત્રબન્ધૂંસ્ત્વં નિહન્તું જયતાં વર ।
ન હિ યુક્તં ત્વયા હન્તું બ્રાહ્મણેન સતા નૃપાન્ ॥ ૨૨॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ એકોનત્રિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૩૦

પિતર ઊચુઃ

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
શ્રુત્વા ચ તત્તથા કાર્યં ભવતા દ્વિજસત્તમ ॥ ૧॥

અલર્કો નામ રાજર્ષિરભવત્સુમહાતપાઃ ।
ધર્મજ્ઞઃ સત્યસન્ધશ્ચ મહાત્મા સુમહાવ્રતઃ ॥ ૨॥

સ સાગરાન્તાં ધનુષા વિનિર્જિત્ય મહીમિમામ્ ।
કૃત્વા સુદુષ્કરં કર્મ મનઃ સૂક્ષ્મે સમાદધે ॥ ૩॥

સ્થિતસ્ય વૃક્ષમૂલેઽથ તસ્ય ચિન્તા બભૂવ હ ।
ઉત્સૃજ્ય સુમહદ્રાજ્યં સૂક્ષ્મં પ્રતિ મહામતે ॥ ૪॥

અલર્ક ઉવાચ
મનસો મે બલં જાતં મનો જિત્વા ધ્રુવો જયઃ ।
અન્યત્ર બાણાનસ્યામિ શત્રુભિઃ પરિવારિતઃ ॥ ૫॥

યદિદં ચાપલાન્મૂર્તેઃ સર્વમેતચ્ચિકીર્ષતિ ।
મનઃ પ્રતિ સુતીક્ષ્ણાગ્રાનહં મોક્ષ્યામિ સાયકાન્ ॥ ૬॥

મન ઉવાચ
નેમે બાણાસ્તરિષ્યન્તિ મામલર્ક કથં ચન ।
તવૈવ મર્મ ભેત્સ્યન્તિ ભિન્નમર્મા મરિષ્યસિ ॥ ૭॥

અન્યાન્બાણાન્સમીક્ષસ્વ યૈસ્ત્વં માં સૂદયિષ્યસિ ।
તચ્છ્રુત્વા સ વિચિન્ત્યાથ તતો વચનમબ્રવીત્ ॥ ૮॥

અલક ઉવાચ
આઘ્રાય સુબહૂન્ગન્ધાંસ્તાનેવ પ્રતિગૃધ્યતિ ।
તસ્માદ્ઘ્રાણં પ્રતિ શરાન્પ્રતિમોક્ષ્યામ્યહં શિતાન્ ॥ ૯॥

ઘ્રાણ ઉવાચ
નેમે બાણાસ્તરિષ્યન્તિ મામલર્ક કથં ચન ।
તવૈવ મર્મ ભેત્સ્યન્તિ ભિન્નમર્મા મરિષ્યસિ ॥ ૧૦॥

અન્યાન્બાણાન્સમીક્ષસ્વ યૈસ્ત્વં માં સૂદયિષ્યસિ ।
તચ્છ્રુત્વા સ વિચિન્ત્યાથ તતો વચનમબ્રવીત્ ॥ ૧૧॥

અલર્ક ઉવાચ
ઇયં સ્વાદૂન્રસાન્ભુક્ત્વા તાનેવ પ્રતિગૃધ્યતિ ।
તસ્માજ્જિહ્વાં પ્રતિ શરાન્પ્રતિમોક્ષ્યામ્યહં શિતાન્ ॥ ૧૨॥

જિહ્વા ઉવાચ
નેમે બાણાસ્તરિષ્યન્તિ મામલર્ક કથં ચન ।
તવૈવ મર્મ ભેત્સ્યન્તિ ભિન્નમર્મા મરિષ્યસિ ॥ ૧૩॥

અન્યાન્બાણાન્સમીક્ષસ્વ યૈસ્ત્વં માં સૂદયિષ્યસિ ।
તચ્છ્રુત્વા સ વિચિન્ત્યાથ તતો વચનમબ્રવીત્ ॥ ૧૪॥

અલર્ક ઉવાચ
સૃષ્ટ્વા ત્વગ્વિવિધાન્સ્પર્શાંસ્તાનેવ પ્રતિગૃધ્યતિ ।
તસ્માત્ત્વચં પાટયિષ્યે વિવિધૈઃ કઙ્કપત્રભિઃ ॥ ૧૫॥

ત્વગુવાચ
નેમે બાણાસ્તરિષ્યન્તિ મામલર્ક કથં ચન ।
તવૈવ મર્મ ભેત્સ્યન્તિ ભિન્નમર્મા મરિષ્યસિ ॥ ૧૬॥

અન્યાન્બાણાન્સમીક્ષસ્વ યૈસ્ત્વં માં સૂદયિષ્યસિ ।
તચ્છ્રુત્વા સ વિચિન્ત્યાથ તતો વચનમબ્રવીત્ ॥ ૧૭॥

અલર્ક ઉવાચ
શ્રુત્વા વૈ વિવિધાઞ્શબ્દાંસ્તાનેવ પ્રતિગૃધ્યતિ ।
તસ્માચ્છ્રોત્રં પ્રતિ શરાન્પ્રતિમોક્ષ્યામ્યહં શિતાન્ ॥ ૧૮॥

શ્રોત્રમુવાચ
નેમે બાણાસ્તરિષ્યન્તિ મામલર્ક કથં ચન ।
તવૈવ મર્મ ભેત્સ્યન્તિ તતો હાસ્યસિ જીવિતમ્ ॥ ૧૯॥

અન્યાન્બાણાન્સમીક્ષસ્વ યૈસ્ત્વં માં સૂદયિષ્યસિ ।
તચ્છ્રુત્વા સ વિચિન્ત્યાથ તતો વચનમબ્રવીત્ ॥ ૨૦॥

અલર્ક ઉવાચ
દૃષ્ટ્વા વૈ વિવિધાન્ભાવાંસ્તાનેવ પ્રતિગૃધ્યતિ ।
તસ્માચ્ચક્ષુઃ પ્રતિ શરાન્પ્રતિમોક્ષ્યામ્યહં શિતાન્ ॥ ૨૧॥

ચક્ષુરુવાચ
નેમે બાણાસ્તરિષ્યન્તિ મામાલર્ક કથં ચન ।
તવૈવ મર્મ ભેત્સ્યન્તિ ભિન્નમર્મા મરિષ્યસિ ॥ ૨૨॥

અન્યાન્બાણાન્સમીક્ષસ્વ યૈસ્ત્વં માં સૂદયિષ્યતિ ।
તચ્છ્રુત્વા સ વિચિન્ત્યાથ તતો વચનમબ્રવીત્ ॥ ૨૩॥

અલર્ક ઉવાચ
ઇયં નિષ્ઠા બહુવિધા પ્રજ્ઞયા ત્વધ્યવસ્યતિ ।
તસ્માદ્બુદ્ધિં પ્રતિ શરાન્પ્રતિમોક્ષ્યામ્યહં શિતાન્ ॥ ૨૪॥

બુદ્ધિરુવાચ
નેમે બાણાસ્તરિષ્યન્તિ મામલર્ક કથં ચન ।
તવૈવ મર્મ ભેત્સ્યન્તિ ભિન્નમર્મા મરિષ્યસિ ॥ ૨૫॥

બ્રાહ્મણ ઉવાચ
તતોऽલર્કસ્તપો ઘોરમાસ્થાયાથ સુદુષ્કરમ્ ।
નાધ્યગચ્છત્પરં શક્ત્યા બાણમેતેષુ સપ્તસુ ।
સુસમાહિત ચિત્તાસ્તુ તતોऽચિન્તયત પ્રભુઃ ॥ ૨૬॥

સ વિચિન્ત્ય ચિરં કાલમલર્કો દ્વિજસત્તમ ।
નાધ્યગચ્છત્પરં શ્રેયો યોગાન્મતિમતાં વરઃ ॥ ૨૭॥

સ એકાગ્રં મનઃ કૃત્વા નિશ્ચલો યોગમાસ્થિતઃ ।
ઇન્દ્રિયાણિ જઘાનાશુ બાણેનૈકેન વીર્યવાન્ ॥ ૨૮॥

યોગેનાત્માનમાવિશ્ય સંસિદ્ધિં પરમાં યયૌ ।
વિસ્મિતશ્ચાપિ રાજર્ષિરિમાં ગાથાં જગાદ હ ।
અહો કષ્ટં યદસ્માભિઃ પૂર્વં રાજ્યમનુષ્ઠિતમ્ ।
ઇતિ પશ્ચાન્મયા જ્ઞાતં યોગાન્નાસ્તિ પરં સુખમ્ ॥ ૨૯॥

ઇતિ ત્વમપિ જાનીહિ રામ મા ક્ષત્રિયાઞ્ જહિ ।
તપો ઘોરમુપાતિષ્ઠ તતઃ શ્રેયોऽભિપત્સ્યસે ॥ ૩૦॥

બ્રાહ્મણ ઉવાચ
ઇત્યુક્તઃ સ તપો ઘોરં જામદગ્ન્યઃ પિતામહૈઃ ।
આસ્થિતઃ સુમહાભાગો યયૌ સિદ્ધિં ચ દુર્ગમામ્ ॥ ૩૧॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ ત્રિંશોऽધ્યાયઃ ॥

---

અધ્યાયઃ ૩૧
બ્રાહ્મણ ઉવાચ
ત્રયો વૈ રિપવો લોકે નવ વૈ ગુણતઃ સ્મૃતાઃ ।
હર્ષઃ સ્તમ્ભોऽભિમાનશ્ચ ત્રયસ્તે સાત્ત્વિકા ગુણાઃ ॥ ૧॥

શોકઃ ક્રોધોऽતિસંરમ્ભો રાજસાસ્તે ગુણાઃ સ્મૃતાઃ ।
સ્વપ્નસ્તન્દ્રી ચ મોહશ્ચ ત્રયસ્તે તામસા ગુણાઃ ॥ ૨॥

એતાન્નિકૃત્ય ધૃતિમાન્બાણસન્ઘૈરતન્દ્રિતઃ ।
જેતું પરાનુત્સહતે પ્રશાન્તાત્મા જિતેન્દ્રિયઃ ॥ ૩॥

અત્ર ગાથાઃ કીર્તયન્તિ પુરાકલ્પવિદો જનાઃ ।
અમ્બરીષેણ યા ગીતા રાજ્ઞા રાજ્યં પ્રશાસતા ॥ ૪॥

સમુદીર્ણેષુ દોષેષુ વધ્યમાનેષુ સાધુષુ ।
જગ્રાહ તરસા રાજ્યમમ્બરીષ ઇતિ શ્રુતિઃ ॥ ૫॥

સ નિગૃહ્ય મહાદોષાન્સાધૂન્સમભિપૂજ્ય ચ ।
જગામ મહતીં સિદ્ધિં ગાથાં ચેમાં જગાદ હ ॥ ૬॥

ભૂયિષ્ઠં મે જિતા દોષા નિહતાઃ સર્વશત્રવઃ ।
એકો દોષોઽવશિષ્ટસ્તુ વધ્યઃ સ ન હતો મયા ॥ ૭॥

યેન યુક્તો જન્તુરયં વૈતૃષ્ણ્યં નાધિગચ્છતિ ।
તૃષ્ણાર્ત ઇવ નિમ્નાનિ ધાવમાનો ન બુધ્યતે ॥ ૮॥

અકાર્યમપિ યેનેહ પ્રયુક્તઃ સેવતે નરઃ ।
તં લોભમસિભિસ્તીક્ષ્ણૈર્નિકૃન્તન્તં નિકૃન્તત ॥ ૯॥

લોભાદ્ધિ જાયતે તૃષ્ણા તતશ્ચિન્તા પ્રસજ્યતે ।
સ લિપ્સમાનો લભતે ભૂયિષ્ઠં રાજસાન્ગુણાન્ ॥ ૧૦॥

સ તૈર્ગુણૈઃ સંહતદેહબન્ધનઃ
પુનઃ પુનર્જાયતિ કર્મ ચેહતે ।
જન્મ ક્ષયે ભિન્નવિકીર્ણ દેહઃ
પુનર્મૃત્યું ગચ્છતિ જન્મનિ સ્વે ॥ ૧૧॥

તસ્માદેનં સમ્યગવેક્ષ્ય લોભં
નિગૃહ્ય ધૃત્યાત્મનિ રાજ્યમિચ્છેત્ ।
એતદ્રાજ્યં નાન્યદસ્તીતિ વિદ્યાદ્
યસ્ત્વત્ર રાજા વિજિતો મમૈકઃ ॥ ૧૨॥

ઇતિ રાજ્ઞામ્બરીષેણ ગાથા ગીતા યશસ્વિના ।
આધિરાજ્યં પુરસ્કૃત્ય લોભમેકં નિકૃન્તતા ॥ ૧૩॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ એકત્રિંશોઽધ્યાયઃ ॥

અધ્યાયઃ ૩૨

બ્રાહ્મણ ઉવાચ

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
બ્રાહ્મણસ્ય ચ સંવાદં જનકસ્ય ચ ભામિનિ ॥ ૧॥

બ્રાહ્મણં જનકો રાજા સન્નં કસ્મિંશ્ચિદાગમે ।
વિષયે મે ન વસ્તવ્યમિતિ શિષ્ટ્યર્થમબ્રવીત્ ॥ ૨॥

ઇત્યુક્તઃ પ્રત્યુવાચાથ બ્રાહ્મણો રાજસત્તમમ્ ।
આચક્ષ્વ વિષયં રાજન્યાવાંસ્તવ વશે સ્થિતઃ ॥ ૩॥

સોઽન્યસ્ય વિષયે રાજ્ઞો વસ્તુમિચ્છામ્યહં વિભો ।
વચસ્તે કર્તુમિચ્છામિ યથાશાસ્ત્રં મહીપતે ॥ ૪॥

ઇત્યુક્તઃ સ તદા રાજા બ્રાહ્મણેન યશસ્વિના ।
મુહુરુષ્ણં ચ નિઃશ્વસ્ય ન સ તં પ્રત્યભાષત ॥ ૫॥

તમાસીનં ધ્યાયમાનં રાજાનમમિતૌજસમ્ ।
કશ્મલં સહસાગચ્છદ્ભાનુમન્તમિવ ગ્રહઃ ॥ ૬॥

સમાશ્વાસ્ય તતો રાજા વ્યપેતે કશ્મલે તદા ।
તતો મુહૂર્તાદિવ તં બ્રાહ્મણં વાક્યમબ્રવીત્ ॥ ૭॥

જનક ઉવાચ

પિતૃપૈતામહે રાજ્યે વશ્યે જનપદે સતિ ।
વિષયં નાધિગચ્છામિ વિચિન્વન્પૃથિવીમિમામ્ ॥ ૮॥

નાધ્યગચ્છં યદા પૃથ્વ્યાં મિથિલા માર્ગિતા મયા ।
નાધ્યગચ્છં યદા તસ્યાં સ્વપ્રજા માર્ગિતા મયા ॥ ૯॥

નાધ્યગચ્છં યદા તાસુ તદા મે કશ્મલોઽભવત્ ।
તતો મે કશ્મલસ્યાન્તે મતિઃ પુનરુપસ્થિતા ॥ ૧૦॥

તયા ન વિષયં મન્યે સર્વો વા વિષયો મમ ॥ ૧૧॥

આત્માપિ ચાયં ન મમ સર્વા વા પૃથિવી મમ ।
ઉષ્યતાં યાવદુત્સાહો ભુજ્યતાં યાવદિષ્યતે ॥ ૧૧॥

બ્રાહ્મણ ઉવાચ

પિતૃપૈતામહે રાજ્યે વશ્યે જનપદે સતિ ।

બ્રૂહિ કાં બુદ્ધિમાસ્થાય મમત્વં વર્જિતં ત્વયા ॥ ૧૨॥

કાં વા બુદ્ધિં વિનિશ્ચિત્ય સર્વો વૈ વિષયસ્તવ ।
નાવૈષિ વિષયં યેન સર્વો વા વિષયસ્તવ ॥ ૧૩॥

જનક ઉવાચ
અન્તવન્ત ઇહારમ્ભા વિદિતા સર્વકર્મસુ । var ઇહાવસ્થા
નાધ્યગચ્છમહં યસ્માન્મમેદમિતિ યદ્ભવેત્ ॥ ૧૪॥

કસ્યેદમિતિ કસ્ય સ્વમિતિ વેદ વચસ્તથા ।
નાધ્યગચ્છમહં બુદ્ધ્યા મમેદમિતિ યદ્ભવેત્ ॥ ૧૫॥

એતાં બુદ્ધિં વિનિશ્ચિત્ય મમત્વં વર્જિતં મયા ।
શ઼ૃણુ બુદ્ધિં તુ યાં જ્ઞાત્વા સર્વત્ર વિષયો મમ ॥ ૧૬॥

નાહમાત્માર્થમિચ્છામિ ગન્ધાન્ઘ્રાણગતાનપિ ।
તસ્માન્મે નિર્જિતા ભૂમિર્વશે તિષ્ઠતિ નિત્યદા ॥ ૧૭॥

નાહમાત્માર્થમિચ્છામિ રસાનાસ્યેઽપિ વર્તતઃ ।
આપો મે નિર્જિતાસ્તસ્માદ્વશે તિષ્ઠન્તિ નિત્યદા ॥ ૧૮॥

નાહમાત્માર્થમિચ્છામિ રૂપં જ્યોતિશ્ચ ચક્ષુષા ।
તસ્માન્મે નિર્જિતં જ્યોતિર્વશે તિષ્ઠતિ નિત્યદા ॥ ૧૯॥

નાહમાત્માર્થમિચ્છામિ સ્પર્શાંસ્ત્વચિ ગતાશ્ ચ યે ।
તસ્માન્મે નિર્જિતો વાયુર્વશે તિષ્ઠતિ નિત્યદા ॥ ૨૦॥

નાહમાત્માર્થમિચ્છામિ શબ્દાઞ્શ્રોત્રગતાનપિ ।
તસ્માન્મે નિર્જિતાઃ શબ્દા વશે તિષ્ઠન્તિ નિત્યદા ॥ ૨૧॥

નાહમાત્માર્થમિચ્છામિ મનો નિત્યં મનોઽન્તરે ।
મનો મે નિર્જિતં તસ્માદ્વશે તિષ્ઠતિ નિત્યદા ॥ ૨૨॥

દેવેભ્યશ્ચ પિતૃભ્યશ્ચ ભૂતેભ્યોઽતિથિભિઃ સહ ।
ઇત્યર્થં સર્વ એવેમે સમારમ્ભા ભવન્તિ વૈ ॥ ૨૩॥

તતઃ પ્રહસ્ય જનકં બ્રાહ્મણઃ પુનરબ્રવીત્ ।
ત્વજ્જિજ્ઞાસાર્થમદ્યેહ વિદ્ધિ માં ધર્મમાગતમ્ ॥ ૨૪॥

ત્વમસ્ય બ્રાહ્મ નાભસ્ય બુદ્ધ્યારસ્યાનિવર્તિનઃ ।
સત્ત્વનેમિ નિરુદ્ધસ્ય ચક્રસ્યૈકઃ પ્રવર્તકઃ ॥ ૨૫॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ દ્વાત્રિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૩૩

બ્રાહ્મણ ઉવાચ

નાહં તથા ભીરુ ચરામિ લોકે
તથા ત્વં માં તર્કયસે સ્વબુદ્ધ્યા ।
વિપ્રોઽસ્મિ મુક્તોઽસ્મિ વનેચરોઽસ્મિ
ગૃહસ્થ ધર્મા બ્રહ્મ ચારી તથાસ્મિ ॥ ૧॥

નાહમસ્મિ યથા માં ત્વં પશ્યસે ચક્ષુષા શુભે ।
મયા વ્યાપ્તમિદં સર્વં યત્કિં ચિજ્જગતી ગતમ્ ॥ ૨॥

યે કે ચિજ્જન્તવો લોકે જઙ્ગમાઃ સ્થાવરાશ્ ચ હ ।
તેષાં મામન્તકં વિદ્ધિ દારૂણામિવ પાવકમ્ ॥ ૩॥

રાજ્યં પૃથિવ્યાં સર્વસ્યામથ વાપિ ત્રિવિષ્ટપે ।
તથા બુદ્ધિરિયં વેત્તિ બુદ્ધિરેવ ધનં મમ ॥ ૪॥

એકઃ પન્થા બ્રાહ્મણાનાં યેન ગચ્છન્તિ તદ્વિદઃ ।
ગૃહેષુ વનવાસેષુ ગુરુ વાસેષુ ભિક્ષુષુ ।
લિઙ્ગૈર્બહુભિરવ્યગ્રૈરેકા બુદ્ધિરુપાસ્યતે ॥ ૫॥

નાના લિઙ્ગાશ્રમસ્થાનાં યેષાં બુદ્ધિઃ શમાત્મિકા ।
તે ભાવમેકમાયાન્તિ સરિતઃ સાગરં યથા ॥ ૬॥

બુદ્ધ્યાયં ગમ્યતે માર્ગઃ શરીરેણ ન ગમ્યતે ।
આદ્યન્તવન્તિ કર્માણિ શરીરં કર્મબન્ધનમ્ ॥ ૭॥

તસ્માત્તે સુભગે નાસ્તિ પરલોકકૃતં ભયમ્ ।
મદ્ભાવભાવનિરતા મમૈવાત્માનમેષ્યસિ ॥ ૮॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ ત્રયસ્ત્રિંશોઽધ્યાયઃ ॥

---

અધ્યાયઃ ૩૪

બ્રાહ્મણ્યુવાચ

નેદમલ્પાત્મના શક્યં વેદિતું નાકૃતાત્મના ।

બહુ ચાલ્પં ચ સઙ્ક્ષિપ્તં વિપ્લુતં ચ મતં મમ ॥ ૧॥

ઉપાયં તુ મમ બ્રૂહિ યેનૈષા લભ્યતે મતિઃ ।
તન્મન્યે કારણતમં યત એષા પ્રવર્તતે ॥ ૨॥

બ્રાહ્મણ ઉવાચ
અરણીં બ્રાહ્મણીં વિદ્ધિ ગુરુરસ્યોત્તરારણિઃ ।
તપઃ શ્રુતેऽભિમથ્નીતો જ્ઞાનાગ્નિર્જાયતે તતઃ ॥ ૩॥

બ્રાહ્મણ્યુવાચ
યદિદં બ્રહ્મણો લિઙ્ગં ક્ષેત્રજ્ઞમિતિ સઞ્જ્ઞિતમ્ ।
ગ્રહીતું યેન તચ્છક્યં લક્ષણં તસ્ય તત્ક્વ નુ ॥ ૪॥

બ્રાહ્મણ્યુવાચ
અલિઙ્ગો નિર્ગુણશ્ચૈવ કારણં નાસ્ય વિદ્યતે ।
ઉપાયમેવ વક્ષ્યામિ યેન ગૃહ્યેત વા ન વા ॥ ૫॥

સમ્યગપ્યુપદિષ્ટશ્ચ ભ્રમરૈરિવ લક્ષ્યતે ।
કર્મ બુદ્ધિરબુદ્ધિત્વાજ્જ્ઞાનલિઙ્ગૈરિવાશ્રિતમ્ ॥ ૬॥

ઇદં કાર્યમિદં નેતિ ન મોક્ષેષૂપદિશ્યતે ।
પશ્યતઃ શૃણ્વતો બુદ્ધિરાત્મનો યેષુ જાયતે ॥ ૭॥

યાવન્ત ઇહ શક્યેરંસ્તાવતોऽંશાન્પ્રકલ્પયેત્ ।
વ્યક્તાનવ્યક્તરૂપાંશ્ચ શતશોऽથ સહસ્રશઃ ॥ ૮॥

સર્વાન્નાનાત્વ યુક્તાંશ્ચ સર્વાન્પ્રત્યક્ષહેતુકાન્ ।
યતઃ પરં ન વિદ્યેત તતોऽભ્યાસે ભવિષ્યતિ ॥ ૯॥

વાસુદેવ ઉવાછ
તતસ્તુ તસ્યા બ્રાહ્મણ્યા મતિઃ ક્ષેત્રજ્ઞસઙ્ક્ષયે ।
ક્ષેત્રજ્ઞાદેવ પરતઃ ક્ષેત્રજ્ઞોऽન્યઃ પ્રવર્તતે ॥ ૧૦॥

અર્જુન ઉવાચ
ક્વ નુ સા બ્રાહ્મણી કૃષ્ણ ક્વ ચાસૌ બ્રાહ્મણર્ષભઃ ।
યાભ્યાં સિદ્ધિરિયં પ્રાપ્તા તાવુભૌ વદ મેऽચ્યુત ॥ ૧૧॥

વાસુદેવ ઉવાચ
મનો મે બ્રાહ્મણં વિદ્ધિ બુદ્ધિં મે વિદ્ધિ બ્રાહ્મણીમ્ ।

ક્ષેત્રજ્ઞ ઇતિ યશ્ચોક્તઃ સોઽહમેવ ધનઞ્જય ॥ ૧૨॥

ઇતિ શ્રીમહાભારતે આશ્વમેધિકે પર્વણિ અનુગીતાપર્વણિ ચતુસ્ત્રિંશોઽધ્યાયઃ ॥

॥ ઇતિ બ્રાહ્મણગીતા સમાપ્તા ॥

Adhyaya numbers 21-34 in Ashvamedhika, Mahabharata critical edition
(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition they are 21-34.
Proofread by Sunder Hattangadi (sunderh at hotmail.com)

*brAhmaNagItA*
pdf was typeset on July 31, 2020

Please send corrections to *sanskrit@cheerful.com*